गतेगणागणैः सार्धं त्वया भूधरकन्यके॥ त्वद्वियोगभियादेवि दुःखेन च परिप्लुतः॥ समं तुष्टाव हृष्टात्मा हिमवान्श्वशुरः कंदरः॥
हिमवानुवाच॥ ॥ शंभो विश्वेश भर्ग त्रिनयन पुरहन् पाहि मामीश दृष्ट्या ख्यातो वेदे गिरीशो गिरिशइति भवांस्तत्कुरुष्वाद्य
नथ्यं॥ शंभो देव्या न याते सुरततरुनितंबेद्रुपादौ वियोगं नो सह्ये मे महेश मम शिखरवरे संवसात्रैव शंभो॥ मदीयापरध्या
न मोघा नलंतालंतेला पि शाश्वतान्विनिवर्तितुं तान्॥ महादेव त्वत्पादपद्मं प्रपन्नः प्रपन्नः प्रपन्नः प्रपन्नः॥ श्रीमद्बिल्वम
हीरुहौघचलनैर्वातादिभिः पावितं गात्रं मे च पवित्रतामुपगतं पाहि त्रिनेत्राधुना॥ तन्मूले नीरप्लुतपूतमस्तकं नेत्रे च तद्दर्श
ने घ्राणे तत्सुमगंधबंधमधुरं मय्येव शंभो वस॥ एवं स्तुतो महादेवि तस्मिन्नाहं महात्मना॥ नगेंद्रपतेः शिखरे निवासं समरोचयं॥
ब्रह्मविष्ण्वादिभिर्देवैः स्कंदेन गणपेन च॥ अन्यैर्गणवरैर्देवि त्वया शैलेंद्रकन्यया॥ समर्चितोवसाम्यत्र केदारेश्वरलिंगकः॥
अलिंगोपि महेशानि सर्वदा लिंगरूपधृक्॥ केदारेश्वरनाम्नाहं ख्यातोस्मिन्धरगौरवात्॥ वसाम्यत्र महादेवि लिंगेस्मिन्पावने शु
भे॥ शनैः समर्चितो नित्यं बिल्वपत्रैः फलैरपि॥ त्वया सहाविकोस्मि सर्वदा सर्वकामदः॥ उदयमलयपारियात्रविंध्यैर्गिरिवरपूर्व
मतोस्मि मानतस्ते॥ सुरवरकिन्नरदेवसंघनंदीप्रमुखगणैः सततं निषेवितः॥ ॥६७॥ ॥इति श्रीशिवरहस्ये पंच
मांशे हिमाचलवासो नाम द्वादशोध्यायः॥ ॥१२॥ ॥ईश्वर उवाच॥ ॥हिमवच्छिखरे देवि लिंगान्यन्यानि
संति वै॥ केदारेश्वरमुख्यानि शृणु तान्यपि पार्वति॥ केदारेश्वरमासाद्य मुच्यते ब्रह्मसंशयः॥ केदारेति सदा जल्पापाघसंघक्षयो
भवेत्॥ हिमवांस्तु सिता गौरी मेनया सह भार्यया॥ केदारेशं समभ्यर्च्य बिल्वपत्रैरनेकशः॥ हृष्टोभवत्तिमल्लिंगनिरीक्षणस

श्रीः
२९

३वली॥ एवं मां स्तौति दृष्टा मां हिमवान्नाम नंदिनः॥

मुमुक्षुः॥ संस्तौति स सततं भक्त्या हिमवानेष भूधरः॥ ॥हिमवानुवाच॥ एकं ब्रह्म जगद्द्वितीयमपि वै लोकत्रयं त्रीनिम
चत्वारः प्रदिशो महेश्वर महाभूतानि पंचैव हि॥ षट् कं ऋतवश्च देवतं पवनकाः सप्तैव वस्वष्टकं दुर्गाणां नवकं दशेन्द्रियगणं त्वत्तोज
गल्लायते॥ ब्रह्मविष्ण्वादयो देवाः केदारेश्वरमीश्वरं॥ तत्रोपगतेशानो देवाः प्रत्यारुणोदये॥ बिल्वपत्रैः समभ्यर्च्य मुहूर्तं विनिवेद्य च॥
वसंति तत्र नियता हिमवच्छिखरे शिवे॥ स्तुवंति वाग्भिर्हृद्याभि ब्रह्मविष्ण्वादिभिः सुराः॥ ॥विष्णुरुवाच॥ हंसः पुष्कर मे बुदंभुत गभुज
मे पयश्च्यात कोयद्वग्रद्दुमासद्दायभगवन् दृष्ट्वा पदाब्जं तव॥ आनंदः समुपैति मां मुहुरहो बध्नाल तन्मे मनः शृणु नाम्नां वर नाम बो
धितकृपा प्रीतोमयथाशोभव॥ ॥विधिरुवाच॥ यस्ते पापैरनेकैरहमिव विनतापुत्र वक्रांतरेण न्यस्तं भस्म्यां जलेस्यो झषमिवनित
रांकठ संचारि जीवं॥ बलं या गौ यहिंसा नतमिव सततं मृत्सुपाशावलीढं त्रस्तं मां कालमृत्सोर बुद्धिवरूपमादेव केदारनाथ॥ नंदीश्वरा
भिधं लिंगं केदारे दक्षिणे स्थितं॥ नंदिनापूजितं लिंगं दृष्ट्वा नंदमवाप्नुयात्॥ नंदीनुष्टाव दृष्ट्वा तल्लिंगं नंदीश्वराभिधं॥ ॥नंदिकेश्व
रउवाच॥ ध्यायं ध्यायमघापहारिचरणं दुस्वापनुत्से सदा॥ पायं पायमपाय दानरहितं कर्णैस्त्वदीयां कथां ध्यायं ध्यायमघौघवमदकस
द्बिल्वी दलं कोमलं॥ जातं जातमुमेश जन्म सफलं प्राहुस्त्वदीयार्चना॥ स्कंदेश्वरमिति ख्यातं स्कंदेनापि सुपूजितं॥ संपूजयित्वा तल्लिंगं केदा
रे दैन्यनाशिनी॥ मंत्रः शक्तिं मुदा प्राप स्तुवाच परमेश्वरि॥ ॥स्कंद उवाच॥ कालकालमुनिबालपालका नीललोहितकरे धृतपू
ल॥ व्यालमाल गलकाल महेश पालल्लोचन दृशाव मां सदा॥ गणेश्वरसंज्ञं च गजाननसुपूजितं॥ लिंगमस्य कमीशानि केदारेश्वर ३
पश्चिमे॥ स्वपुष्करोद्धृतनीरैः स्वशुंडावल्या हृतैः॥ बिल्वपत्रैः पंकजैश्च पूजयत्येव विघ्नराट्॥ मदंगसद्गृत्तारावबंहितेन समोस्तुव
त्॥ ॥गणेशउवाच॥ त्रियंबकं ला सुभगं महेशं सुगंधिं पुष्टिदायकं॥ मां मृत्सुतो मोचय या भुउर्वारुक मिव बंधनात्॥ बयासेफले
तल्लिंगं देवि गौरीश्वराभिधं॥ तल्लिंगसंगवातो पि मुक्तिये देहिनिविष्यति॥ कुंडं चापि कृतं देवि गौरीकुंडं च पश्चिमे॥ केदारेशं च मां दृष्ट्वा

शीतातकुंडजं पयः॥ सपुनस्तन्यपयसास्योदरंनाभिषिंचति॥ वपात्रस शिष्यैः सार्धं वसितुः शिखरे शिवे॥ तपस्तसे महादेवि दु
ष्करं परमर्षिभिः॥ महामाप्य येत्र केदारेस्थाप्य गौरीश्वरं हरं॥ स्नानासनाभ्यां नियतायमेन नियमेन च भस्मरुद्राक्षयुक्तांगी त्रिपुंड्र
वलिभासुरा॥ परिसर्पोगभूषादि वल्कलाजिनधारिणी॥ पुष्पाण्याहृत्य पुण्यानि बिल्वपत्राणि शोभने॥ सुरभीणि मनोज्ञानि संप
न्नाहृत्य निशं दिनं॥ केदारे पावने लिंगे गौरीलिंगे तथा शिवे॥ समर्चितस्त्वया देवि स्तुतोहं परमेश्वरि॥ ॥पार्वत्युवाच॥ शांगमंग
ल दंभु भोगदल स द्भुभारसंगास्पदं दधानंगकृतांगसंगतमहत्तुंगोत्तमांगं हरं अष्टांगैस्सकसंगं दहरभव नगंगंधमाल्यार्चितांगे
लिंगस्थैः सकलिंगे विमलमुनिमनः स्वांतरंगैभजे हं॥ गौरीलिंगमघरागविषंगं दुःखसंगगलितांतरसंगं॥ तुंगपुष्पफलदंग
तसंगं हृष्टमद्यवृषभांग शुभांगं॥ विविधैरमितैश्च साधनैर्मखजालैर्गजिताखिलागोग्रहानैः॥ सनकाद्यैर्न महेशपादपद्मं प्रियं दिनस्या
च्छिवभक्तसंगिसंगः॥ ॥ईश्वर उवाच॥ त्वत्स्तुत्याहं परं प्रीतः भक्त्यात्वत्कृतया शिवे॥ लिंगसंपूजने नापि तुष्टः कष्टनिवारकः॥ त
वेष्टदाननिपुणः कृपापूर्णेन चक्षुषा॥ समागतो हं कल्याणि शैवविप्रस्वरूपतः॥ लिंगामलजटामौलिस्त्रिपुंड्रावलिभासुरः॥ रुद्राक्ष ॥श्रीः॥
मालाभरणः क्रोधमनिसंमितः॥ दृष्ट्वाहं तापसं विप्रं समुत्थायार्घ्यपूजनैः॥ पूजयित्वा सुखप्रश्नैः फलकंदानि वेदनैः॥ अपर्णे पर्णसं ॥३०॥
कृष्ते तार्ज्छ द्विराश्रमे॥ स्वच्छे निश्रमनिस्तंद्रे तुष्टस्त्वत्कृतपूजया॥ कुशाद्यासंसांनि विष्टस्तेनसुखालोकनादरः॥ कल्याणीं च सु
खोदारां तं वाणीमुक्तवत्यासि॥ ॥पार्वत्युवाच॥ कुतः समागतं विप्र देशः सुखयिता चकः नानाद्रुमलताकीर्णे कंटकावृतदुर्गा
धि॥ कथं समागतं ब्रह्मन्नामगोत्रं च तेद्य किं॥ तव संदर्शनाद्विप्र तपश्चीर्णं मयाधुना॥ दयया मां निरीक्ष त्वं ब्रूहि दिंकरवाण्यहं
भस्माभ्यक्ततनुः सदा शैवकथापीयूषपानादरो रुद्राक्षाभरणः शिवैकशरणः पंचाक्षरावर्तकः॥ पुण्येयस्य गृहे फलादि शिरहेरा

ऽयं १

ऽयं स्य सच्छरीरा क्षीरापूर्यादि संरूपैर्मधुरफलरसैः फलितैः वर्ये॥ तस्या स्वस्थागपदिकान्वित साधु जिह्वा स्वादास्पदीकृतस
दन्नगणा निर्मुक्ते॥ तस्या विश्लिष्टमपि विरूपक्षो नामितो नुष्टः प्रदास्पति दूरोदूरतीदृक्षं॥ इत्थम् चुमेदाशैव फलैर्वैषविसरस्वः॥ जनं
तवसेक्षणानाकृष्टः शिपि विश्लेनसंशयः॥ इत्थं वद्धचनं श्रुत्वा विप्ररूपो हमं बिके॥ वामवोचे रोषयितुं स्तुतिनिंदाकरं वचः॥
विप्रउवाच॥ ॥बालाहं पर्वतस्यास्य तव याच्यकुलमुद्भूतं॥ शिरीषमृदुलाते धतनुः कथं नु तपः शुभे॥ भूषणादिप्रभाजालैस्तुंद
रांगेतवामले॥ भस्मरुद्राक्षमालाभिः किं त्वां मां वृंत्ते यहि॥ महार्हवाससावीता वल्कलाजिनसंवृता॥ त्वयाकीला विलासेनरवे
त्वनीयं सरवीगणे॥ लिंगसंपूजनादस्माद्धालेत्वं विरमाधुना॥ विजने विपिने घोरे सिंहव्याघ्रगणाकुले॥ कथमेकाकिनी संत्यक्ता नि
द्राति देसि भूधर॥ वत्समाता वा तथा मेना बालां कुलवरीं सुतां॥ सत्वाद्य प्रयातासा हृसहो साद्रसं भृतं॥ किं त्वं प्रार्थयसे भीरु
किं वांछसि त्वं तपस्यथ॥ तदेतत्साधयाम्यद्य पश्य मे तपसो बलं॥ इति विप्रवचः श्रुत्वा सस्मिता बिस्मिताप्यसि॥ इवं दुःखमवदन्मौवि
त्वोक्षोध्यभाषिथाः॥ ॥पार्वत्युवाच॥ किं ते व्यवसितं ब्रह्मन्न्वतपो व्यवसाधने॥ नाहं तत् धूमे यथा कामं गच्छ वा तिष्ठ य६
भ५ वा द्विज संकल्पपथं वीरं तस्मादिष्टं वृणोम्यहं॥ विरूपाक्षामिहसुप्रीतो नत्दावशीषयम् तीवे॥ ॥विप्रउवाच॥ यदुक्तं त्व
या बाले पशुभर्तामहेश्वरः॥ तवेदृदानिपुणः सर्वथं पर्वतात्मजे॥ उन्मत्तो पिक्रूरतामुंडः कपाली भस्मभूषितः॥ इत्थं मत्निंदवं श्रु
त्वा सरोषा त्वं महेश्वरे॥ गच्छ गच्छेति तं विप्रं निराकुर्सा टलंगता॥ ॥पार्वत्युवाच॥ कोयं विप्रो देहरूपः शिवनिंदापरायणः
हा कष्टं सखि येनेय श्रोत्रे निंदा श्रवं गते॥ किं पताम्यद्य शिखरादस्मान्मम पितुः सखि॥ शिवनिंदा श्रुता प्रागमानि मृतिमे रणं
खलु॥ पूर्वं दक्षसुता हं तु श्रुत्वा निंदां महेशितुः॥ दक्षाद्दक्षत्वतः साध्व्याद्विक्षिप्तासा तनुर्मया॥ इति सा निश्चयं कृत्वा स्यक्तुमे

मैष स्वभुतं तदा॥ एतस्मिन्नंतरे गौरि सर्वं विग्रस्य तद्वपुः॥ त्रिलोचनमुदारांगं नीलग्रीवं त्रिशूलिनं॥ गौरीलिंगात्समुद्भूतं
मां दृष्ट्वा हर्षमागता॥ प्रणम्य मां भक्तियुक्ता सखीभिः कमलानने॥ अस्तौषीस्त्वं तदा देवि भक्तियुक्तेन चेतसा॥ ॥गौर्यु
वाच॥ देवस्त्वं सहमान एव भगवन्नस्य कृपापेक्षापि पापात्मनां गणनापि नो मम प्राविशो तस्मात्सहस्वाधुना॥ नाभ्यर्च्य भगवन्सदा
बुद्ध्या मया दृष्टं न लिंगं स्वकं दर्शनं मया सहृत्तानः स्तवये महेश्वर सदा ते संपापैः प्रतापैरपि गतिर्नो कृता॥ यस्त्वां जिह्माधिया महेश्वरमन
साराध्य न चाप्यर्चयेतास्त्वं वंचयसे महापापैः शतैः पापैः प्रतापैरपि॥ तस्मात्त्वं परिवंचको सि भगवन् यो बिल्वपत्रैर्मुदा त्वल्लिं
गं स्वकं दर्शयन्हि सभवे मुक्तिं गयाःपतिः॥ इति सा त्वं तदा स्तौषी पौर्णं मया च विनयेन च॥ तव पाणिं गृहीत्वा तु प्राप्तास्मि गिरिकन्य
स०७ के॥ त्वया संपूजिते लिंगे गौरीश्वरो संभवोऽस्म्यहं॥ गौरीलिंगे स दृष्टे तज्जन्मसफलं भवेत्॥ केदारेशस्य दिग्भागे दक्षिणे सरस
शी स्तटे॥ दृष्ट्वा गौरीश्वरं लिंगं गौरीलोके वसेच्चिरं॥ नंदीश्वरस्तथा ग्रामस्ते भीष्ट फलप्रदः॥ तत्र तप्त्वा तपो नंदी गणाधिप समप्रभः सदा
म्॥ पश्चिमे गणनाथेशो गणवृंदैश्च पूजितः॥ गौरीश्वरो दक्षिणतः स्वयं देवि समर्चितः॥ स्कंदेश्वरस्तथोदीच्यां स्कंदेनैव सु ॥ ३१ ॥
पूजितः॥ मध्ये केदारनाथस्य लिंगं श्रेष्ठं तु मे सदा॥ हिमवच्छिखरे देवि दृष्ट्वा नत्वा च संगतः॥ गौरीसरसि मज्जन्नः सेवेत ती
र्थजं त्वाप्लुतः॥ केदारेश्वरमाराध्य कोऽनघुत्पत्बंधनात्॥ केदारलिंगस्य दर्शनं भूतं न भविष्यति॥ सकृत्संपूज्य कपस्ते मु
क्तिमंते गिरींद्रजे॥ हिमवच्छिखरे देवि पञ्चपकं केदारमीश्वरं॥ अश्वमेधशतेभ्योऽपि फलं लब्ध्वा विमुच्यते॥ ॥ई
श्वर उवाच॥ ॥योमामनन्यगतयाश्रीवभावभक्त्या केदारमीश्वर महाचसमुद्रसेतुं॥ सेतस्थ्य चित्रमुम

यासमुपेतमीशमाशास्यमारजनकादिसुपूजितांघ्रिं॥ बिल्वीदलैश्चकमलैश्च सदाहि भक्त्या नीलोत्पलैश्चकुमु
दैर्गिरिजे समुक्त:॥ ॥ ॥५४॥ ॥इतिश्रीशिवरहस्ये पंचमांशे शिवगौरीसंवादे गौरीलिंगमहिमानाम
त्रयोदशोध्याय:॥ ॥५४॥ ॥ईश्वर उवाच॥ ॥पुनरन्यां कथां देवि शृणु श्रवणभूषणां॥ सौराष्ट्रे क्षेत्र
मस्येकं सोमनाथाह्वयं शुभं॥ तत्रासीन्महितो राजा शीतांशुकुलभूषण:॥ अनपस: सर्वदेवि सौराष्ट्रेशो बृहद्बल:॥
पयोष्णीतीरमासाद्य सिंधुराश्च समन्वित:॥ महसासेनया सार्धं महिष्या च समन्वित:॥ मुद्गलस्याश्रमं प्राप श्रांत: स
र्वकरैर्नृप:॥ प्रणम्य मुद्गलं राजा पूजितस्तेन विष्टरे॥ निषसाद महीपाल: पप्रच्छ कुशलं मुनिं॥ आश्रमेषु च पुण्येषु तथाग्नि
शरणेषु च॥ ॥राजोवाच॥ कच्चिन्निर्विघ्नितं ब्रह्मन् तपस्ते ग्निमुखा: क्रिया:॥ भवच्छिष्यगणा: सर्वे विनीतास्तपयि स
न्नमे॥ मृगपक्षिगणा: सर्वे गावश्च सुखिनो मुने॥ हास्तिहस्त परामृष्टं नववनं ते महामुने॥ बृहद्बलस्य तद्वाक्यं श्रुत्वा
समुनिसत्तम:॥ स उवाचाथ राजानं प्रसन्नवचसा मुनि:॥ ॥मुद्गल उवाच॥ त्वयि शासति भूलोके सर्वं च निरु
पद्रवं॥ त्वया चपालिता: सर्वे निवसाम तपस्विन:॥ तपसा परमेशानं समभ्यर्च्येय थाविधि॥ भवान पि सदा राजा
सुखी सैन्य समावृत:॥ कोशागारे तथा राष्ट्रे अमात्ये दुर्गे रक्षणे॥ दारपौरादिकार्येषु विनीतोसि नृपात्मज॥ इत्थं मुनिव
च: श्रुत्वा स राजा मुद्गलं तदा॥ प्रांजलिर्विनयोपेतो मुद्गलं वाक्यमब्रवीत्॥ ॥राजोवाच॥ धन्योहमधुना विप्र
यन्मां त्वमनुकंपसे॥ शोभवत्स्यांचतेदृष्ट्या सर्वं कुशलमेवमे॥ तथापि हृद्गतो भाव: सहयायाप्यपूर्वदृ॥ शोषवा

दिव्ही॥ छायावृक्षामयामार्गे रोपिताश्चैव कोटिशः॥ ५

एवं लोकेषु शंभुवो मुनिसत्तम॥ तद्दयापांगसंगेन सुखसंगो ममाभवत्॥ विश्वस्त स्त्वयि वासंते पितरीव महामु
ने॥ कारणं तत्र वक्ष्यामि नादिहै कंपना: शृणु॥ असंख्यं गणनाहीनं वित्तमस्येव मद्गृहे॥ मातंगाश्च तुरंगाश्च उत्तुंगाः
संति कोटिशः॥ गोखरोष्ट्राजाविकाश्च बलीवर्दाश्च कोटिशः॥ रथाश्च शिबिकाः संति दंतिदंतो त्तमैः कृताः॥ हिरण्यर
जतानां च रत्नानां चैव राशयः॥ गिरींद्रशिखराकाराः संति विप्र सहस्रशः॥ मद्गृहे नियतं वित्र धान्यानां गणनेव न
अमासाबांधवाः पौराश्च साश्चैव सत्तमया॥ इद्दपुरुजनं सर्वदीपिविश्वार्चनेरतो॥ ब्राह्मणावसथाश्चैव सोर्वरा: शर्वतुष्टये॥
पानीयशालाश्चिराः सरस्तीराणि वोटिशः॥ विश्रांतिमंटपाश्चापि कृताः सान्नमयामुने॥ अश्वमेधादयो यागास्वाद्दत्वा बहुदक्षिणाः॥
कृताः सहस्रशो विप्रसाक्षाछंकरतुष्टये॥ न तस्करः स्वैरिणीवा अनग्निर्नैव मे पुरी॥ ग्रामे राष्ट्रे जनपदे दरिद्रो नास सहस्रदः॥ दारा मनोह
राः संति रमाधिक्वारिणीर्मम॥ शतसंख्या मुनिश्रेष्ठ शरदिंदुसमाननाः॥ अवाहूते शासनं मे सर्वदेशेषु सत्तम॥ दास्यो मनोहराः सं ॥श्री॥
ति पीनश्रोणिपयोधराः॥ यौवनोन्मादसंवीता निष्ककंठ्यो वराननाः॥ दासाश्च मे घनादृष्ट्या युवानो मृष्टकुंडलाः॥ भटाश्च समरोत्साहाः सर्व
शस्त्रधराः सदा॥ जेतारो रिपुसैन्यानां न कदाचित्पराजिताः॥ सर्वमेतन्मुनिश्रेष्ठ नैवानंदकरं मम॥ नंदनाख्ये दहीनस्य नानंदः क्वापि दृश्य ॥३२॥
ते॥ इत्युक्त्वासोऽश्रुपूर्णाक्षो राजो श्वाससमन्वितः॥ दुःखितः प्रांजलिर्विप्रं प्रणनाम पुनः पुनः समुनिः सांत्वयन्वाक्यैर्वैरराजानिति ब्रुव
न्॥ स्वप्राणैरक्मलेनैव तन्मुखं परिमार्जयत्॥ तमाहूत्वपतिं विप्रो ध्यायन्नीशानमव्ययं॥ अमुद्गल उवाच॥ त्वं राजा सबेलो
कानां सस्वधर्मपरायणः॥ त्वयानंदं दृशोलोकूध नैर्धनपतेः समः॥ त्वयाश्वमेधैः सततं त्वसोमेध पतिर्यतः॥ स त्वकामं प्रयाति
कामादेनो त्र संशयः॥ पयोदस्योस्तादिराजेंद्र न यामस्यां सुखामयो॥ इत्युक्तः सोऽपि नृपतिः स्नाता न यां महामुनि॥ शरणं सच्चगामैव

स्कंमम शुचिस्मिते ॥ समुद्धूलनदेगानि भस्मनास्वकरांबुजैः ॥ अग्निरित्यादिभिर्मंत्रैः क्रियासुषत्रिपुंड्रकैः ॥ ईशानेतिचमंत्रेण
दृढैरुद्राक्षमालिकाः ॥ प्रदद्दैशां सर्वविद्योश्रीमत्पंचाक्षरीं शुभां ॥ सतयाविद्ययारेजेराजाचंद्र इवोद्गतः ॥ नभभस्मसीवामलेदे
वितारागणपरीवृतः ॥ सामासंभोजयामास मुनिर्मूलफलैर्नृपो ॥ शिवनैवेद्यमास्वाद्य स्वादोः स्वादीयमुत्तमं ॥ नियुक्तस्तेन
मुनिनासतुराजा दृढद्रुतं ॥ प्रणम्यतंमुनिं राजाप्रांजलिस्तं वचोब्रवीत् ॥ ॥ राजोवाच ॥ अनुज्ञास्तु भवानेव तद्क
रिष्यामिसादरं ॥ तदानृहृद्धलवचो मुनिः शुभातदाब्रवीत् ॥ ॥ मुनिरुवाच ॥ राजन्नियतवान्मौनी निःसंगद्वजपादरः
जपपंचाक्षरीं विद्यांपंचपातकनाशिनीं ॥ अग्निरित्यादिभिर्मंत्रैः समुद्धूलयस्वांतनुं ॥ क्रियासुषैरस्थबद्धैश्चत्रिपुंड्रंधार
यादरात् ॥ शिरोललाटवक्षस्सुकंठबाहुजसंधिषु ॥ रुद्राक्षंधारयेद्याभुर्कंठकर्णकरादिषु ॥ बिल्वपत्रैर्बाणलिंगं
नियमेनसमर्चय ॥ शिवनैवेद्यमास्वाद्य प्रहृष्टो भवपार्थिव ॥ शांभवांछिवनैवेद्यौ भोजयायसहस्रशः ॥ त्रिनेत्रमु
रूपाद्रेंद्रि शांभवाद्भवकेवलं ॥ शांभवाद्भवतेप्रज्ञास्थातुर्वर्ण्येषुवैन्नृप ॥ शांभवानांरक्षणेन शंभुःप्रीणातिनान्य
था ॥ शांभवो नामराजेंद्र शिवैकशरणस्तु यः ॥ भस्मत्रिपुंड्ररुद्राक्षमालाधिलिंगपूजकः ॥ सोमवारव्रतंचैव नक्तसो
मीशिवार्चकः ॥ तस्यकापतितोभ्यादृतिज्ञाबालपारगाः ॥ शिवंमासचतुर्दश्यांकृष्णपक्षेविशेषतः ॥ समर्चयमहादेवं
नक्ताशीसततंभव ॥ तसकृ० ॥ कालाष्टम्यांमहादेवं कृष्णपक्षेविशेषतः ॥ सेपूज्यरात्रौनक्ताशीमासिमासिनृपोत्तम
तसकृ० ॥ श्रीप्रदोषव्रतंपुण्यंपक्षयोर्नियतंकुरु ॥ पंचामृतैर्लिंगमौलिंपूतसौरमहेश्वरं ॥ बिल्वपत्रैःपंकजैश्चसम

भ्यच्छैवीवं तदा॥ नक्तं नैव यमा स्वाद्य शांभवैः संवसायवे॥ तसंक्ता०॥ ग्रहणे सोमसूर्याथे पुण्यपर्वसु शंकरं॥ संपूज्य देवदे
वस्यालिंगे पापैर्विमुच्यते॥ भस्मरुद्राक्षधारीनां गात्रं दंडयाशु विनाशय॥ ऊर्ध्वपुंड्रादिचिन्हं कान्देशान्निःसारया धुना॥ ऊर्ध्वपुं
ड्रं धृतं येन नत्न्मुखं नावलोकय॥ यदि पश्येभ्रमाद्वापि चंद्रभानुमुदीक्ष्य च॥ जपपंचाक्षरीं विद्यां सर्वदोषनिवारिणीं॥ श्रा
वैः सहास्तु संलापः हास्यासोन्यादिलापतैःत॥ त्रिकालमप्रमादेन बिल्वपत्रैः समर्चय॥ सर्वोरवगेसामासः सदारस्त्वं महे
श्वरं॥ कुरु बिल्ववनादीनि पुष्पापारवनान्यपि॥ शांभवांश्छिवनैवैद्यैः पावनैर्भोजय याधुना॥ भवोभावमुखेनैव सुक्तं जलानि स्ते
पोत्रम॥ शृणु शैवीं कथामेव शांभवैर्कृतिभाषितः॥ बिल्वमन्येषु संततं शिवलिंगानि पूजय॥ मीलोमले बिल्वपत्रे द्रव्याणामा
ग्रे दैर्दिले॥ संपूज्य महादेवं तेन पापक्षयो भवेत्॥ शिवालयानां निर्माणे कुरुष्वोद्दामगोपुरं॥ प्राकारमंटपोपेते रथोत्सव
विराजिते॥ शिवलिंगालयान्येव दीपैरुज्वलयाधुना॥ संमार्जितानि सततं धूपितानि सदा कुरु॥ गंधागरूधृतैर्यैस्त्वमासेचय ॥श्री॥
महेश्वरं॥ रुद्रसूक्तैर्महादेवं जलाविछिन्नधारया॥ मृदंगुत्पाघात जाराबैर्नौटपैःकाहलशंखवद्वैः॥ नादैः संवादितं शंभोरालं
यं कुरुभूपते॥ स्वर्णरौप्यादिपात्राणि पूजार्थं शंकरे कुरु॥ रथोत्सवादिकं शंभोराजन्रथपतो कुरु॥ सत्रातिरात्रैर्विविधैस्त्रिनेत्रं ॥३२॥
संजयाधुना॥ अध्वरेशं महादेवं सर्वदा शरणं व्रज॥ सोमनाथं महादेवं सोमार्धकृतशेखरं॥ ध्यायन्देवं विरूपाक्षं दाक्षायण्या
समन्वितं॥ मंत्रिवर्गे समाधाय राज्यमेतदखंडितं॥ खंडेंदुमौलौ सततं निवेशय मनोन्नृप॥ तेनात्याखंडलोन्द्रमीक्षामेकामनाशिवास्
नात्र॥ प्रासोपि नियतेरात्रमेवं तेविशयो भवेत्॥ सोमनाथं महालिंगं पयोष्णीतीरसंस्थितं॥ तत्रत्वं नियतोभूत्वा तपः कुरु महा
मते॥ सदारः शिवपत्न्यायां रुद्रसूक्तजपादरः॥ जपः पंचाक्षरीं विद्यामयुतं प्रत्यहं नृप॥ तदा शिवप्रसादेन तनयो विनयोज्वलः॥ भ

वेदूव प्रसादेन समहीं पालयिष्यति ॥ मा शुचस्त्वं नृपश्रेष्ठ गच्छ सोमेश्वरालये ॥ वर्षाणि त्रीणि नियतं तत्र सम्यक् तपः कुरु ॥ प्रदो
षेषु महादेवं सोमनाथं समर्चय ॥ मंद प्रदोषे शिवलिंगपूजां कुर्वन्लभेद्द्वादशवर्षपूजां ॥ मंदारकुंदनवचंपकैः बिल्वपत्रैर्मुनिं
प्रयाति सुकृतं च फलं लभेत ॥ मीढुष्टमः शिवतमः श्रुतिषु प्रसिद्धः सिद्धौघवंदितमहापदपद्मयुग्मः ॥ तं भक्तियुक्तमनसा समु
पास्य शंभुं सोमेश्वरं नतसुरासुरवृंदमौलिं ॥ वसुधाधिपते पतिं पत्नीनां समुपास्य प्रमथाधिनाथनाथं ॥ धृतचंद्रकलं गलेगरं
त्वयि मीढ्वासुत माशु दापयेत ॥ ॥ सूत उवाच इति मुनिवचनं निशम्य राजा स ततः शंकरपादपद्मलोलः ॥ स तु सैन्यसमा
वृतो ययौ प्रणतः सत्तमुनि माशु सोमनाथं ॥ ६७ ॥ इति श्रीशिवरहस्ये पंचमांशे नृपानुशासनं नाम चतुर्दशो
ध्यायः ॥ ॥ १५ ॥ सूत उवाच ॥ सौराष्ट्रे सोमनाथं तं गत्वा सम्यग्विचक्षणः ॥ पयोष्णीसलिले स्नात्वा अ
माहेशाद्यमादरात् ॥ समाविश्य सदारश्च तपश्चक्रे सुदारुणं ॥ स सुतार्थं तदा राजा शिवे विन्यस्तमानसः ॥ महार्हे वसनादीनि त
थैवाभरणानि च ॥ सम्यक् चीरादिभिः संछन्नो रुद्राक्षाभरणोज्ज्वलः ॥ भस्मछन्नत्रिपुंड्रांकः सर्वदा शिवपूजकः ॥ सर्वमन्यत्परित्यज्य
शिवं ध्यायन्विमत्सरः ॥ रुद्रावर्तनशीलश्च सदा पंचाक्षरं जपन् ॥ स्त्रक्षावनन्यया शैवलिंगार्चनपरायणः ॥ बिल्वपत्रैर्वन्यपु
ष्पैः फलमूलैर्महेश्वरं ॥ स्वर्शानुरिपुचंडांशुसोदरैर्मुमम्लग ॥ तच्छदृच्छन्नसूरोरुकिरणः स्वच्छमानसः ॥ पदार्थबोधविस्प
ष्टवचसा रुद्रजापकः ॥ रुद्रविन्यस्तहृदयो गुच्छीकृतजगत्त्रयः ॥ तस्य दारा महोदारा नतसेवानिरतः सदा ॥ बिल्वपत्राणि पुष्पाणि
च मलान्यमलान्यपि ॥ नीलोत्पलानि फुल्लानि तथाबोवनदान्यपि ॥ फलमूलानि चारूणि सुस्वादूनि तदागमा ॥ समाहृत्य स
भर्तुस्ताः परिचर्यापरायणाः ॥ तस्यामासेन जाह्नवे सत्यरात्म्यस्पसत्क्रिया ॥ निवेदयंति सततं शर्वध्यानपरायणौ ॥ राजा नेते

समागम्य प्रणम्य विनयान्विताः॥ सभाग्य सोमगैः सततं सभाग्यः पश्यदच्छिवं॥ एवं संवसत स्तस्य दर्शनान्नष्ट किल्बिषः काले
भूयान्नवर्तत॥ तं पश्यंतं तु राजानं दृष्ट्वा मुनिगणास्तदा॥ असंतं विस्मयाविष्टाः तेपि विष्टपरायणं॥ मुनयस्ते तदा दृष्ट्वाद्दृम
नुः परस्परं॥ ॥मुनय ऊचुः॥ अहो ह्येतादृशी निष्ठा न दृष्टापि भुवि विश्रुता॥ कुतोद्य दर्शनं विप्रा नष्टापत्कुल संचयः॥ धन्योयं कृत
कृत्सोमं सोमनाथार्चनेरतः॥ राज्ञोथ शांभवस्यास्य दर्शनान्नष्ट किल्बिषाः॥ वयमप्यनुयास्यामो निष्ठां कष्ट विनाशिनीं॥ एतस्य सु
कुमारांग्योदारामारमनोहराः॥ रंभाधिक्कारकारिण्यात्तरूपश्रियदर्शिनाः॥ विस्तीर्णायितसुश्रोण्यः पीनतुंगपयोधराः॥ गौरीमा
राधयेतिस्म वल्लिध्यपादेक्षिः सदा॥ राज्ञोप्यस्य च दारा राजा दिवं वादास्यति शंकरः॥ अनेन कृतकृत्सेन वयं धन्यास्म सर्वदा॥ इत्यन्योन्य
मुनिगणाः सदाराः सकुमारकाः॥ विनयावनताः सर्वे उपतस्थुस्तदान्पं॥ राजापि मेले पत्न्या बुध्यै तैः सीमि राजिनेशपि॥ तानागता
न्नृपो दृष्ट्वा उत्थायाथ प्रणम्य च॥ तान् पूजयित्वाथ धर्मेण साघ्यपाद्यपुरःसरं॥ शांभवान्विनयाद्रालाप्रमति रूढाक्षधारिणः॥ प्रां
जलिर्विनयेनाह भवभक्त्यान्हृदव्रतान्॥ ॥राजोवाच॥ धन्योस्म्यहं मद्राज्ञो वा भव सांद्रात्सुदर्शनात्॥ त्रिनेत्ररूपाः सुत्राममा
न्याय्यं विशेषतः॥ भवदागमनेनैव विपिनं पावनं मम॥ वाणीपतिस्तिमितः यं भूत किंकरवाणि वः॥ इति राज्ञोर्थगंभीरां श्रुत्वावा
चंतु शांभवाः॥ राजानं शांभवश्रेष्ठं सोमशेखरपूजकं॥ प्राहुस्ते विनयोपेतं सदाराः सकुमारकाः॥ ॥शांभवा ऊचुः॥ सुधाधाम ॥३४॥
खंडोज्वला मौलिर्गंगाप्रकृष्टो रुलिंगा चैनास कृचिन्ना॥ विरक्ताः सुरक्तास्त्वया शांभवेन वदूमोद्य निर्देगचित्ताः॥ सुरवाय चिराया
बिल्वैः समभ्यर्च्य लिंगान्यमोघानि दिव्यान्यरसंमलगानि॥ त्वयाराध्य मुक्तिं भजामोद्य मुक्तिं त्वया शांभवेनाद्य वस्तुं मनोनः॥ ॥
सूत उवाच॥ शांभवानां वचः श्रुत्वा राजा संतुष्टमानसः॥ प्राहूतान् प्रणयोदारान् सदारः प्रांजलिस्तदा॥ ॥राजोवाच भव
द्भिः शांभवैः सार्धं सोमशेखरपूजकः॥ वसामि स्वामि सोमो कलिंगपूजापरायणः॥ अतः परं किमुत्कृष्टं भाग्यं शांभव सत्तमाः॥

भवसूतांगसंगेन पापपंकं गोप्स्वेन्मम॥ ऊमिसुस्काश्च मुनयो बिल्वमूलेषु शंकरं॥ भस्मनोद्धूलसर्वांगमग्निरीत्यादिमंत्रत॥ रु
द्राक्षधारिणः सर्वे कंठकर्णगलादिषु॥ बाणलिंगेषु तुंगेषु बिल्वमूलस्थितेषु च॥ बिल्वपत्रैः सदारास्ते पूजयामासुरीश्वरं॥
शांभवांश्च सहायांस्तान् शिवनैवेद्यराशिभिः॥ भोजयामास नृपतिर्नित्यं शतसहस्रशः॥ सदा शिवकथाप्रवर्तत स्यावर्ते तसंसदि
कृचिदुद्दं जपंति स्म बिल्वमूले द्विजोत्तमाः॥ केचित्पंचाक्षरजपं कुर्वंति नियतं शिवे॥ बिल्वमूलेषु लिंगेषु नीरधाराप्रकल्पनैः॥ का
ळं नयंति तत्रैवा बिल्वपत्रार्चनैः परे॥ आसाय मत्रमादेन आ सूर्योदयमद्विजे॥ कालकालार्चनेनैव कालस्तेषां क्षणायते॥ शिवपि
विष्टार्चनपरास्तेन राज्ञा प्रपूजिता॥ तानदृष्ट्वा सत दारा जात हृष्टः शैवपुंगवान्॥ प्रकृष्टतरमात्मानं मन्यते सोऽद्य हृद्गतः॥ शांभ
सह वैः सल्लापं कुर्वन् शिवकथादिभिः॥ चकारकालापनयं कालकालार्चनात्परः॥ तद्दारा मुनिपत्न्यस्तास्तेषां च परिचर्यया॥ शिवा
र्चकार्चनेनैव नैवेद्यपरिकल्पनैः॥ कालो नीतो महादेवि तैः सर्वैर्मुनिभिर्नृपः॥ मोदमाप तदा संतं सोमनाथार्चने रतः॥ विपिनस्थो
पि नृपतिः शांभवैः परिवारितः॥ त्रिविष्टपसुखं प्राप स्मावाखंडलो यथा॥ तान् दृष्ट्वा मागताः सर्वे मयाच प्रेषितागताः॥ नंद्याद
यो महादेवि विमानैर्हंसयायिभिः॥ त्रिशूलकरभस्मांगास्त्रिपुंड्रावलिभासुराः॥ जटामुकुटबद्धेंदुखंडाखंडलधर्मकाः॥ तान् दृ
ष्ट्वा शांभवश्रेष्ठान् गणान्स विनयान्वितः॥ स राजा ते मुनिश्रेष्ठा धन्याः स्म इतिवादिनः॥ तानूगणान्विनयेनाह मधुराक्षरसंयुतं॥ ॥
राजोवाच॥ कुतः समागमं नंदिन् किं ते कार्यं समुद्यतं॥ अस्माकमद्य सफलं जन्म नोस्य प्रजायते॥ त्वत्कृपापात्रभूतानां शां
भवानां विशेषतः॥ दुःखजालानि सर्वाणि विनष्टानि गणेश्वर॥ ॥नंदिकेश्वर उवाच॥ धन्योमान्योसि मे राजन् सभवान् शां
भवपुंगवः॥ त्वत्संगसंगवातोऽपि मे गलाय प्रजायते॥ मंगलापतिसोमेशलिंगपूजापरायणः॥ बिल्वपत्रादिभिः सम्यक् स

भाग्योसि महीपते ।। एतेपि मुनयः सर्वे भवलिंगार्चनेरताः ।। नव शांभवसंगस्था धन्याः शर्वपरायणाः ।। बिल्वमूले पुष्टरूपेते लिंगानिवि
मलान्यपि ।। बिल्वपत्रोत्तमांगानि चंदनालंकृतानि च ।। मंदारकुंदमालाभिः पूजितानि नृपोत्तम ।। फालाक्षप्रतिरूपाणि त्रिपुंड्रेणो
ज्वलानि च ।। पञ्चपार्श्वितरक्षाग्यस्थलानीतोसि नृपसत्तम ।। नयनानंददान्येव कैलासादधिकामही ।। सोमनाथमिदं क्षेत्रं सोमराजप्र
पूजितं ।। सोमनाथाख्यलिंगस्य दर्शनं सर्वकामदं ।। त्वया शांभवधर्माणामाचारो विस्तरीकृतः ।। यस्तु शांभवधर्माणां प्रवर्तनपराय
णः ।। सत्संदूरोन्नपश्रेष्ठ शंकातंकादिवर्जितः ।। महत्त्वाप्रियगारूसः गणेशश्च प्रजायते ।। तद्दर्शनकृतो कंठात्नीलकंठः पिनाकधृक् ।।
अस्मान्नृपसंप्रेषयामास विमानैः सार्वकामिकैः ।। त्वया शांभववीरेण संगताश्च महौजसः ।। भूमंडलाखंडलस्त्वं त्वया धन्यतरा मही ।। य
त्र शांभवपादाब्जरेणुः पतति सततं ।। स देशः पावनो धन्यस्तेन धन्यतरा मही ।। यतः शांभवकोटीभिः सततं त्वमुपासितः ।। अस्मर
द्राक्षयुक्तश्च चातुर्वर्ण्येषु मानवः ।। सपूज्यः सर्वयत्नेन माननीयश्च केवलं ।। तत्रापि ब्राह्मणाः पूज्याः शांभवास्ते नृपोत्तम ।। धन्याः पूज
यितव्याश्च यतो ब्रह्मण्यदृश्वराः ।। ब्राह्मणे शांभवश्रेष्ठे वसेन्नित्यं पिनाकधृक् ।। ब्रह्मण्यश्च त्वं यतो राजन् शांभवाचारपरायणः ।। त्रिनेत्र ।। श्रीः ।।
गात्ररूपोसि सत्त्वमाचरपूजितः ।। इत्युक्त्वा नंदिकेशः सन्नृपतिं शांभवोत्तमं ।। ब्राह्मणांस्तान्नमस्कृत्य राजानं परिषस्वजे ।। शांगसंगा
लिंगनेन दृष्टानंदाश्रुसंयुतः ।। उवाच गणपान्वीक्ष्य राजानं च गणेश्वरः ।। ।। नंदिकेश्वर उवाच ।। अहो बिल्वमूलस्थलिंगार्चने ।। ३५ ।।
नघ्रकृत्यानि कृत्यानि न कृतानि सघ ।। विरक्ताच्च संयोवसिद्धाद्दि सिद्धः स पूर्वाश्रमर्तैः कटाक्षैक लेशैः ।। गताबिल्ववनं न वारुणदृक
क्रांतोरःशारवान्वितं तं गौरि सरसि प्रक्षत पयसि स्नाता कृतो द्वंद्वनः ।। धृतलापालतले त्रिपुंड्ररचनां रुद्राक्षमालांगले ध्यातार्शंक
रमर्चपातकपुतो न वाजनो मुक्तिभाक् ।। लब्ध्वाथी नरूमल्लगोमेनुगणं गच्छन्नाधिवपतौ शैवं चापि षडक्षरं प्रजपतां मुक्तिं ददा

तीश्वरः ॥ श्रीरुद्रं यजुषां वरं च पठतां प्रीतो भवेच्छंकरस्तन्मन्त्रोक्षजलैः शिरः प्रसिंचयन् तीर्थैः समस्तैः प्लुतः ॥ ॥४९॥ ॥
इति श्रीशिवरहस्ये पंचमांशे नंदीश्वरसमागमो नाम पंचदशोऽध्यायः ॥ ॥१५॥ ॥राजोवाच ॥सोमनाथेश्वरे लिंगं
सोमराज्ञा प्रपूजितं ॥ इत्युक्तं च त्वया नंदिन् तेन संपूजितं कथं ॥ तदाख्यानं विशेषेण मे सर्वं कथय विस्तरात् ॥ ॥सूत उवाच ॥ सराज्ञो
वचनं श्रुत्वा नंदिकेशः शिवार्चकः शिवपादांबुजध्यायन् दक्षवाक्यो भवत्पुंगवान् ॥ बृहद्बलं च राजानं गणेशो नंदिकेश्वरः ॥ प्राह तं शांभ
वं विप्राः शैलादिर्गिरिजे तदा ॥ ॥नंदिकेश्वर उवाच ॥ अत्रेतिहासं वक्ष्यामि सावधानमनाः शृणु ॥ बृहद्बल महाभाग शांभवैः सह
सादरं पंचाशत्कन्यका ह्यासन् दक्षस्यैव प्रचेतसः ॥ ददौ स दश धर्माय काश्यपाय त्रयोदश ॥ सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेम
ये सतीं ददौ स रुद्राय महादेवाय शूलिने ॥ शिवमिंदाकरं त्यक्त्वा पितरं स्वां तनुं तदा ॥ प्रादहत्सा सती कोपाद् दक्षो नीतो ह्यदक्षतां ॥ मखं तक
स्तदा राजन् देवाः संताडिता गणैः ॥ दक्षयज्ञहरः शंभुर्नाम्नासीत्स तदा शिवः ॥ सोमो धरो हिणीं प्राप्य मुदमाप तदा सुखं ॥ अन्याः सा दक्षदु
हिताः दक्षं प्राप्य सुदुःखिताः ॥ लज्जया किंचिदानम्य वदनं ताः समब्रुवन् ॥ ॥दक्षकन्या ऊचुः ॥ भगवन् सोमराज्ञा हि वयं सर्वा वि
मानिताः रोहिणीमेव भजते नास्मासु रमते तथा ॥ इत्थं पुत्रीवचः श्रुत्वा सोऽवदद्वेमिदं वचः ॥ प्राह दक्षस्ततो गत्वा सोमं ते न च पालि
ताः ॥ ॥दक्ष उवाच ॥ सर्वाः पाणिगृहीतास्ते अतिचारो हि तासु किं ॥ भजसे रोहिणीमेव नैतत्त्वय्युपपद्यते ॥ पुत्र्यो मे नावमंतव्याः तस्व
यं यथा सुखं क्रमं ॥ बहुभार्यो यश्च भवेत्सम्यक्तान्यां काममोहितः ॥ अदाय भजते यश्च स याति यातनां ध्रुवं ॥ नैवं देवा हविस्तस्य
पितरस्तत्स्वधामपि ॥ नाश्नंति शतवर्षाणि त्वणहा स हि रुच्यते ॥ मृतो हि श्वानयोनीषु दारसामी वशोन्नरः ॥ इति धर्मं विदित्वा
पि कथं सोम भजेश्च भवान् ॥ सोमो दक्षवचः श्रुत्वा सो वचनं श्वशुरं नृप ॥ वाच माह तदा भीतः प्रांजलिः प्रणतस्तदा ॥ ॥सो

मुवाच॥ प्रजापते क्षमस्वेमं मेतु मा क्रुद्ध मप्यपि॥ सर्वास्त्वेवानुवर्तेहं यथापूर्वं न संशयः॥ दक्षः सोमवचः श्रुत्वा स्वकीयं भ
वनं गतः॥ पुनश्च कामात्मं दात्मा रोहिणीमुपसेवते॥ तदा ताः कन्यकाः सर्वाः पुनः प्रोचुश्च तत्कृतं॥ ॥कन्यका ऊचुः॥ प्रह
यासां पितः पूर्वं सोमो नास्मासु वर्तते॥ यथापूर्वं स कामात्मा रोहिणीमुपसेवते॥ शशाप क्रोधाद्दक्षस्तं कन्यानां वाक्यसायकैः॥
दक्ष उवाच॥ ॥यस्मद्यक्ष्मगृहीतस्त्वं सद्यो निर्वीर्यतां गतः॥ अतिकामो ह्यतो नित्यं मद्वाक्यस्य च लंघनात्॥ तत्क्षणाद्दक्षवत्सो
मः सद्यो निष्प्रभतां गतः॥ यक्ष्मणा सगृहीतश्च द्विः कालं स समन्वितः॥ हगस्त्विशेषः सोमो द्विजवद्धीनस्तदा नृप॥ अतिर्लग्नाम परमो
नमन्त्रि प्रणते द्विजः॥ सोमराजानमाहेदं दक्षशाप विमुक्तये॥ ॥अत्रिरुवाच॥ शृणु धर्मेण चोराजन् पुनराप्यायंयिष्यसि॥ स्थारणं
गच्छ देवेशं तपसा शिवपूजया॥ सोमनाथाभिधं लिंगं सौराष्ट्रे संस्थितं शुभं॥ मुनिभिः प्रणतं लिंगं पयोष्णीतीरसंस्थितं॥ ब्रह्मविष्ण्वा
दिभिर्देवैः सेवितं सर्वकामदं॥ तस्मिन् लिंगे महादेवो नित्यं संनिधिकास्मरवः॥ इत्यत्रिवचसा सोमो ज्ञात्वा गत्वा महेश्वरं॥ स्नात्वा नत्वा महादेवं
पयोष्णां धूतकिल्बिषः॥ धस्मनो द्धूलसर्वांगं तताप परमं तपः॥ शिवलिंगार्चनरतः पंचाक्षरपरायणः॥ धस्मस्तोद्धूलसंस्थश्च रुद्रमावर्त ॥श्रीः॥
यन्सदा॥ त्र्यंबकं साचरो हिष्याक्ने पुष्पफलादिभिः॥ अतिष्ठत्सततं मौनी दशवर्षाण्यथांबिके॥ तपस्यतोथ सोमस्य प्रशांतिरासीच्छि
वाज्ञया॥ सोमनाथं महालिंगं बिल्वपत्रैः समर्चयन्॥ त्रिकालमघमादेन सोमार्धकृतशेखरं॥ एवं स वसतस्तस्य सोमः सोमायतो ३६॥
षित॥ सोमनाथात्तु या लिंगात्तस्मै प्रादुरभूच्छिवः॥ गंगाचंद्रकलामौलिमेद्रोक्षवरवाहनः॥ उमासंश्लिष्टवामांगो गणवृंदनिषे
वितः॥ ब्रह्मविष्ण्वादिभिर्देवैर्महेंद्राद्यैः सुरोत्तमैः॥ कुमारगणनाथैश्च मयाच परिसेवितः॥ गजमरेद्रवृषभमयूरहंसयानैः स्वावर्गै
रनुयायिभिः पृष्ठलग्नैः॥ रजताद्रिनिभप्रख्यं विशालं गंदृषभं वेसदि मुख्ययानयानुयातः॥ अधिरुह्यामरचामरौघवातैर्व्यो

ज्जैः छन्नगणो विहोक्षितांगः॥ परशुवरकुरंगबालपाणिस्सगवानाविरभूत्तदामुदामहेशः॥ तथागतं महादेवं दृष्ट्वा
हृष्टतनूरुहः॥ प्रणम्य सोमः सांष्टांगमष्टमूर्तिं कृपाकरं॥ तुष्टाव प्रांजलिर्धीरो मां सांबं परमेश्वरि॥ ॥सोम उ
वाच॥ नमस्ते महादेव विश्वाधिकेश नमस्ते महेशान लोकेश शंभो॥ नमस्ते गणाधीश वृंदारवंद्य नमस्ते हरिब्र
ह्म मृग्यांघ्रिमौले॥ नमस्ते महोक्षैकवाहैन प्रपन्नं सदा पांग संगाद्य दृष्ट्या ह्यनुष्टया॥ नमस्ते बलीशान विश्वैकवंद्य
क्षयार्तिं विनाश्याशु मां तारयाद्य॥ नमस्ते भिषक्श्रेष्ठ सेषज्यचिंतावहस्त्वाद्य मामद्य यक्ष्मादिमुक्तं॥ विमुक्तो कुरुष्वाद्य पा
पौघजालैर्नमस्ते स्तुरंशो प्रसीद प्रसीद॥ इति संप्रार्थितो देवः सोमराजाथ संस्तुतः॥ दयार्द्रदृष्ट्यापातं वीक्ष्य समानस्य च
पाणिना॥ पुनः पुष्टिं तस्य गात्रे अमृतैः स्पृशयत्र दा॥ समाद् विनयोपेतं सोमं सांबस्तदा मुदा॥ ॥ईश्वर उवाच॥ दक्षशा
पवशात्सोमः क्षयेणार्तिपरागतः॥ पुनराप्यायितश्चासि मया बेसुरसत्तम॥ देवानाममृतं तस्व ममृतांशुः पुराकृतः॥
तच्चाप्यमानयत्स्वाय मासार्धे क्षीणमंडलः॥ देवानामुपभोज्योसि देवाश्चाप्यायसेत्यपि॥ पुनस्त्वामौषधीशानं पक्षार्धमह
रात्सुर॥ संपूर्णकलया नित्यं वर्धमानो दिने दिने॥ भविताचाररूपेण मम मौलिकृतास्पदः॥ अष्टमीसामिसोमाको भविता
हं सदा शशिन्॥ चंद्रचूड इति ख्यातः संस्तुतः सुरसत्तमैः॥ त्वया संपूजितं लिंगं सोमनाथाद्वयं शुभं॥ ये पश्यंति नराभक्त्या
ते सदा गणपा मम॥ सोमनाथं सकृद्दृष्ट्वा मुच्यते भवबंधनात्॥ पयोष्णायेसकृत्स्नाता दृष्ट्वा सोमेश्वरं नराः॥
संतर्प्य च पितॄन्भक्त्या वसंति शिवमंदिरे॥ पौष्यां माघ्यां मधाष्टम्यां यो बिल्वैः सोमनायकं॥ समर्चयन्स मुक्तो हि नात्र का

र्थविचारणा॥ इतिदत्तावरं तस्मै नंदीशं शंभुस्तिरोदधे। तस्मिन् लिंगे नदा विष्टः शिपिविष्टो विकासुखः॥ तस्मात्त्वमपि
भक्त्या च सोमेशं प्रपद्यस्व श्रितः॥ लप्स्यसे चेप्सितान्कामान्कामारिकृपया नृप॥ ॥सूत उवाच॥ इति नंदीश्वरप्रश्रे
ष्टमनुज्ञाप्य महेश्वरं॥ सोमनाथं बिल्वपत्रैः पयोभिश्च सरिदंभसा॥ अभिषिच्याथ रुद्रेण पूजां ते गणपे दृते॥ तुष्टाव देवम
भ्यर्च्य शृणुध्वं तद्द्विजोत्तमाः॥ ॥नंदिकेश्वर उवाच॥ कुंडलीकृतकुंडलशंभोरवंदिताखिलसुरद्रुहखंड॥ जह्नुमुंड
कलितामलमालस्थूललिंगगणमंडलसंस्थ॥ नवचंद्राभरणोत्तमांगगंगाकलितालकभव्यधरोरुमाल॥ धृतह
लाहलकंठमलबाहुस्फुरदुग्रसपीलाविधृतभ्रकु आलिंमलिंगं शशीलिंगसंस्थमाकाशलिंगं जगदेकलिंगं॥
हृत्कोशजाकाशविकाशलिंगं सुरेवलिंगं प्रणमामि लिंगं॥ इत्थं संस्तुस नंदीशो वैलासं गणपे ययौ॥ गणेंद्रास्तु स्तुवुः
शंभुं सोमनाथं मुदा तदा॥ ॥गणेश्वरा ऊचुः॥ वयं सोमवारव्रतेते च निष्ठा वासिष्ठादिशिष्टास्ततस्त्वत्प्रसादात्॥ महा
भस्मरुद्राक्षमालांतनत्युल्वदीयां गचिन्हैर्निवेशो स्वपापैर्वियुक्ता भ्रमामो विभ्रमो य शंभो॥ इत्थं स्तुत्वा गणायाता नंदिकेशोन २८
सादरं॥ स राजा विस्मितश्चासीच्छ्रोत्वेत्तत्कथारसैः॥ ॥ईश्वर उवाच॥ चक्षुश्रोत्रविभक्षणेनसु महालिंगार्चने सन्नि
धीन्यस्तापारसुवेषराद्रि विषयप्रीतिं तदा वैनृप॥ कामादिप्रभवादिषट्कलुषैः कल्कीकृतांतस्फुरज्ज्ञानबोधशिव
प्रसादतृलनिता नंदेन विज्ञानभाक्॥ स्मरमानं देककामारविराशीकृतभुक्धाम सीमाद्रमीशो तस्मिन् लिंगेद्रमायेन्नातमरव
मुखगैर्देवबंदैकपूज्यः॥ सामस्तोमैरनेकैर्निखिलमुनिकृतैर्होमधर्मादिमार्गैरलुप्तःसोद्भवानि श्रुतिशिखरवरैस्तुस

संवसामि

माहात्म्यमादिं सोमेशाख्ये गणेंद्रैर्मे मतन्नय वरैश्चांबया ॥ ॥४७॥ ॥इति श्रीशिवरहस्ये पंचमांशे शि
वगौरीसंवादे नंदिकेश्वर बृहद्दुल्लसंवादो नाम षोडशोऽध्यायः॥ ॥अथ॥ ॥ईश्वर उवाच॥ ॥सुराष्ट्रापुरीशानं
सोमनाथाख्यमीश्वरं ॥पूजयामास देवेशि भक्त्याचानन्यया तदा॥ ॥ऋषय ऊचुः॥ कथं तस्य तदा सूत सोमनाथो महेश्व
रः ॥प्रसन्नः पार्वतीनाथो निशानाथनमच्छिराः ॥तद्वदस्वानुपूर्व्येण नैव तृप्यामहे वयं ॥भगनेत्रपदद्वंद्व कथयो पावित्ताबयंध
भवारव्यदावदग्धालांशाः मनेऽव्वतं दोषपान ॥महादेवकथाधारा सुधाशीकरविग्रहान् ॥कुरु चास्मान्मुनिश्रेष्ठ कृपापात्राव
यं हि ते॥ ॥ईश्वर उवाच॥ इति पृष्टो मुनींद्रैस्तैः सूतस्तच्चरितं पुनः ॥प्रांजलिर्विनयेनाह प्रणिधाय मनः शिवे॥ ॥सू
त उवाच॥ सुराष्ट्राधीशो भैवैः सार्धं शिवाराधनतत्परः ॥पंचाग्निमध्यनिरत नतसः सर्वभोगसत्तिभिः ॥मासमेकं फलाहारो मासे पर्णा
शनोऽभवत् ॥मासमेकं तु आशनो राजा मासं चैव जलाशनः ॥मासे यवागुभक्षी स्यान्मासे वानिलभोजनः ॥वर्षास्वभ्रावकाशे
श्च हेमंते जलसंश्रयः ॥ग्रीष्मे पंचाग्निमध्यस्थो रुद्रावर्तेयनस्थितः ॥एवं तपस्यतस्तस्य कालाहादुर्बभौ हरः ॥ब्रह्मविष्ण्वादि
भिर्देवैस्तैस्समेतद्दृशनं ददौ ॥नीलकंठो जटामौलिस्त्रिशूलविलसत्करः ॥सुधाधामकलामौलिः फालोज्ज्वलितलोचनः ॥त्रिपुंड्र
रेखाविलसत्फालभागमनोहरः ॥फणिकंकणशोभाढ्य वृत्तबाहुचतुष्टयः ॥विधिकृत महामुंडवल्पितस्रग्विभूषितः
महावृषभमारुह्य छत्रचामरपाणिभिः ॥नंदिकेशमहाकालगजवक्त्रैर्निषेवितः ॥उमासंश्लिष्टवामांगो राजानं समुद्दे
क्षत ॥दृष्ट्वा सुराष्ट्रदेवेशं महेशं करुणाकरं ॥प्रणम्य परया भक्त्या सानंदजललोचनः ॥तुष्टाव सन्निधिं स्थिरतः सांबं

चंद्रार्धशेखरं ॥ ॥राजोवाच॥सुरेश्वरं निरीश्वरं गिरीश्वरं नटेश्वरं ॥महेश्वरं मयस्करं शिवं भजे च शंकरं ॥भुजंगराज
हारकं सुमार मारहारकं ॥महाविषाग्निधारकं भजे विमुक्तिदायकं ॥पुरादिवृंददुःखदं शुभांगदं शुभास्पदं ॥सुबद्धकर्ममोक्ष
दं भजे शिवं विमुक्तिदं ॥विधींद्रविष्णुसन्मुखं महागिरींद्रवासखं ॥धनेशमुख्यसत्सखं भजे शिवं मदुन्मुखं ॥उमापतिं सभा
पतिं दिशापतिं पशोःपतिं ॥गिरांपतिं पतेःपतिं भजे शिवं दिवस्पतिं ॥इति त्वकूपरिधानशंकर महादेवेश मामागहि विश्वने
त्रशरासनं हरिशरो हसोमदिग्गज शीरसूर्ज तर्जकमेषपरसु तपयः पुरायथागोभैरेत् ॥तदद्य वं गिरिजामनोहरविशोह
तपद्मसंस्थं मम तत्प्रसादश्रमरस्य त्रिसुरसामो हासये वे वलो ॥विष्णुवेदि च गीत स्वम सिसगवनशेवरविसोसु धन्वाचासि
तं हमसिभव विश्वाधिकाभिषक् ॥नमीतानेयध्ये निखिलसुमनस्वामचहरं नमो क्षिस्तेपादं शरणादशिवं स्तोमिवचसा ॥उन्म
त्तकुक्षिकरसन्निभकुंभसंस्थकुंभीनसोच्छ्वासविलोलहारं ॥कुंभीद्रवक्त्रोज्ज्वलपुत्रवर्यं भजामि कुंभोद्भवपूजितांघ्रिं ॥
नदास्तु हा महादेवं शरणप्रपन्नपोनम ॥देवीं देवांकभागस्थो तुष्टाव नियतो नृपः ॥ ॥राजोवाच ॥विद्रुमाधरनिराकृत
बिंबां वक्त्रलालितसुधाकरबिंबां ॥ईश्वरीमनिशमात्मकदंबां मन्मनः स्मरशतुतांजगदंबां ॥पादयोरवनतामरदारारभ
तलोककलुषादविहारान् ॥भावुकस्य हृदयारविदारान्बेशमनो भव जगम्हतिदारान् ॥पापदारिपुशिखां स्मरामौ वीवि
श्रुती मधिकचं समरमौर्वी ॥नेत्रपद्मजघनेषु सुगुर्वी मन्मनः स्मरतु तां हृदि गुर्वीं ॥स राजा गिरिजां स्तुत्वा सदारः प्रणनाम
च ॥बद्धांजलिकरस्तत्र देवदेवमुदैक्षत ॥तस्य तद्भावमालाय भवेत्सावविनाशकः ॥वरेणछंदयामास राजानं वाक्

श्रीः ३८

सुधारसैः॥ ॥ईश्वर उवाच॥ स्तुतस्त्वया नृपश्रेष्ठ तुष्टोस्मि गिरिकन्यया॥ ममभक्त्यावहयातु ब्रोनास्तिभमेडल्धेधुना॥ येमो
त्वत्कृतयास्तुत्यास्तोष्यंतिभुविभाविताः॥ तेषांतुदेहमसर्वंभविता नात्र संशयः॥ क्ष्मासेतुलारवंतस्ते पुत्रो धर्मेन्द्रपोत्तम॥ सनाम्ना या२
भविता राजन्नुत्तमः सविदूरथः॥ सोपिमां सोमनाथाख्यं समाराध्य गणोभिवेद॥ अश्वमेधादिभिर्यज्ञैः स यष्टा च भविष्यति॥
तस्य तुष्टो हमुत्कृष्टस्तत्कष्टं नाशयाम्यहं॥ तस्य पुत्रशतं भव्यान्महारथसमाह्वयं॥ वंचोतेगणपश्रेष्ठो भविष्यसि ममाग्रणीः॥
सोमनाथमिदं लिंगं सोमराहृाग्रपूजितं॥ ये पश्यंति सदा भक्त्या तेषां कामानदद्ाम्यहं॥ स्वदारस्त्वं चिरायाद्य भुंक्ष्वा राज्यमकंटकं॥
वंशं लोके प्रतिष्ठाप्य यास्यस्यंते ममागतः॥ इत्थितं समनुज्ञाप्य देवदेवो घृणानिधिः॥ तस्मिन्लिंगवरे पुण्ये सोमनाथाह्वये द्विजाः॥
तिरोधत्त क्षणात्सोबोभक्त सेसारमोचकः॥ पश्यतां चैव सर्वेषां शंभवानां स्वरूपस्य हि॥ तत्त्व न सदृशं सर्वं दृष्ट्वा राज्ञा च विस्मि
तः॥ शांभवैः संस्तुतो राज्ञा धन्यस्त्वमितितन्नृहि॥ साक्षाद्यतस्त्वया दृष्टं महेश्वरपदांबुजं॥ तव भाग्यस्य नो यस्य लाभ यो धन्यतमाव
यं॥ दूषं तु नरस्तदा राजा शांभवान्प्रजपभक्तितः॥ स्वदारामास सहितो नत्वा सोमेश्वरं तदा॥ सैन्यभारसमायुक्तो रथकुंजरवा
जिभिः॥ स्वदेशाय ययौ राजा प्राप्तसर्वमनोरथः॥ ॥सूत उवाच॥ तदुत्कृष्टमिदं क्षेत्रं पुण्यं सोमेश्वराह्वयं॥ दिव्ये देवेन कथितं पयो
ष्णीतीरसंस्थितं॥ दर्शनात्सर्वकामानां सिद्धिः स्याद्वै वरानना॥ सौराष्ट्रे तद्देशानां पुण्यदेशोयमुत्तमः॥ सोमनाथाख्यलिंगेन
पुलर्क्षयो विराजते॥ सोमनाथं महादेवं प्रदोषे पश्यति॥ बिल्वीदलादिभिः पूज्य स मोक्षमधिगच्छति॥ पयोष्णीयेसकृ
त्स्नात्वा सोमनाथं प्रणम्य च॥ समुक्तः सर्वपापेभ्यो मोदते दिवि देववत्॥ इंदुग्रहे कुरुक्षेत्रे यो दद्याद्गोशतं द्विजे॥ सकृद्दृष्ट्वा सो

मे०१

ममार्थं तत्क्षणं ज्ञानुयाम्बरः॥ महापातादिवेलासु अयने विषुवे सदा॥ पर्वकाले यथाशक्त्या यो हि स्वात्मार्चितिं च॥ सोमनाथमहा
लिंगं सर्वसिद्धिकलोकगम्॥ सोमवारे सोमनाथं रात्रौ संपूज्य भक्तितः॥ बिल्वपत्रैः सकृत् कृत्वा सञ्ज्ञानेनं विंदते महत्॥ सोपिता
ज्ञाथकालेन पुत्रं भद्रगुणान्वितं॥ आप नामापि चक्रे थ विदूरथ इति द्विजा॥ सोपि चांते शिवं प्राप सदा तोष बृहद्द्रुजः॥ पित्र्यंरा
ज्यं तदा प्राप विदूरथ नृपस्तदा॥ सोमनाथमहालिंगे तस्याभिरुच्युत्कैरन्नमा॥ सौराष्ट्रं सज्जगामाथ सांष्टांग स्पष्ट भूतलः॥ संप्
ज्य परयाभक्त्या नानाविभवविस्तरैः॥ उवास राजा तत्रैव न हृत्तोथ मिथ्या करोत्॥ तौ वाञ्जैवेय राशीभिर्योजयामास कोटिशः॥ पयोब्धि
तीरबंधं च नानासंस्थानमंटपान्॥ महारथं महादेवे मंटपोद्यानगोपुरं॥ प्राकारसंस्थ हृष्ट संसुधा चित्रविचित्रितं॥ कारयामास
विश्वेविमानछत्रचामरं॥ धूपदीपादिपात्राणि सौवर्णानि तदाकरोत्॥ शिवपूजाभिवृध्यर्थं ददौ ग्रामाननेकशः॥ द्विजानां
शांभवानां हि ग्रामान्विप्रगृहाश्च लक्षान्॥ कारयामास नृपतिर्गेहोपकरणान्वितान्॥ ददौ स शांभवान् हृष्ट्वा सोमनाथस्य तु श्रीः
ष्टये॥ सद्वो टिबिल्वपत्रैश्च पूजयामास तं तदा॥ कृष्णगोघृतदीपैश्च दीपयत्स्व शिवालयं॥ धूपधूमगणौर्मांसः धूपयामास
हि५ चांबिके॥ नैवेद्यैश्च घृतापूपराशिभिर्निवेदयत्॥ स्वाहूलराशीभिर्देवि विदूरथसमाहूयः॥ नाट्यवन्याः सुचार्वंग्यस्तेन दत्ता ३९
महेश्वरि॥ वेणुवीणामृदंगाश्च शंखकाहलवादकाः॥ कल्पितास्तेन देवेशि नादितं मे शिवालयं॥ सोमनाथे मयि सदा तस्य भक्तिः
पराभवत्॥ नयाश्च मयापि चिरं राज्यं भुक्ता महालोकमागतः॥ तस्य पुत्रशतं चासीत् सर्वं महाक्षिपाविते॥ धनुष्मंते महाबाहुं परवी
यैनिबर्हणे॥ क्षयद्वीरपरं सर्वं नानाशास्त्रमंडले॥ तस्य ज्येष्ठसुतस्त्वासीत् महारथ इति स्मृतः॥ सोपि सोमेश्वरे भक्तः सो भ
राष्ट्रमभवच्छिवे॥ पितुः शतगुणं तेन कृता मे परिचितिः शिवे॥ न स्मिंच्छासति निष्फलो के श्रेवाड्वसदाज नाः॥ सस्मरुद्राक्षही

भि

नांगांछा स्तिभ्य प्रोय मुगमः॥ नारद क्षुद्र शृंगत्रासीन्नारदाध्यायवर्जित॥ पंचाक्षर विहीनश्च शिवलिंगार्चने झितः॥ नासस्म
फाल स्तत्रासीत्स्मिर राज निवासरति॥ समर्यादम भक्ते न ध्यात त्वं तेन सुंदरि॥ यथा विद्योतते भानुः स्वांशुर्दिनोदये स्ततः॥ त
थावेदो दीप्ता चोरेन्नेगत्रापमपावरोतु॥ ॥ ईश्वर उवाच॥ इसेतन्मया रव्यातं नवाद्यं द कथानकं॥ सोमनाथमहत्वास्य श्रुत्वा
पापैः प्रमुच्यते॥ यएतत्कथयेन्नित्यं सदा पर्वणि पर्वणि॥ ब्राह्मणो नियतं देवि मुक्तिमंते प्रयाति च॥ शौसुं सेन त्रावाहमंडलगतं
स्वांतस्वछहृस प्रगंको शातीतमनंत मव्ययमजं स्वात्मानमेका हृयं॥ विश्वातीत मनेक विश्वजनकं गौर्या समालिंगितं ध्याला
शोकशते विमुक्त हृदयः स द्योभवसे बिके॥ ॥८०॥ ॥ इति श्री शिवरहस्ये पंचमांशे शिवगौरीसंवादे सप्तदशो
ध्यायः॥ ॥८१॥ ॥ईश्वर उवाच॥ ॥ आवटकं महापुण्यं क्षेत्रमस्से व मंबिके॥ नागनाथाह्वयं लिंगं ममास्ति भुव
नेश्वरि॥ तत्र संस्थिकताः सर्वे लिंगरूपाश्च केवलं॥ तत्र संति महाशैवा नागनाथार्चने रताः॥ भस्म रुद्राक्षसंपन्नाः शिवध्यान
परायणाः॥ रुद्रावर्तेन शीतस्त्र्यंबरद्लिंगैकपूजकाः॥ मन्नामनिरता नित्यमन्यनामपराङ्मुखाः॥ मल्लिंगालोकनेनैव तेषां प्रीति
रहर्निशं॥ कामुकः कामिनीं दृष्ट्वा यथा प्रीतो भवेच्छिवे॥ मम लिंगे तथा शैवा बिल्वसंरहितं मुदा॥ नागनाथं स्तु वसेव वीक्ष्यं
तिप्रणमंति च॥ वसंति तत्र मुनयो विनयोज्वल विग्रहाः॥ नागनाथं महादेवं पूजयंति गणेश्वराः॥ नागकुंडमिति ख्याते पा
ताले विवरं महत्॥ तन्मार्गेण समागत्य शेषो नंतफणामुखः॥ स्वमौलिरत्नजाले मां पूजयसे वशंकरि॥ सहस्रवदनेना
पि स्तुवसत्के महेश्वरं॥ मां स्तोति शेषस्त्यानियतं स मे गणवरोत्तमः॥ तस्मिन् प्रीतिममासंते कुमारे गणपे यथा॥ वायुसर्व
मरेशानि तथा शैवाय मंबिके॥ शेषं शरीरं देवेशि मदात्ययमनुत्तमं॥ तस्यैव हृदयं भोग गभागारे मनोरमे॥ नीवा

रश्चक्रसदृशा लिंगाकारेऽस्मिन् शांकरि ॥ तद्दूरेयेन संपूज्य स्थितं सोऽपि मदर्चकः ॥ शैवसंपूजनाद्देव मम प्रीतिर्महेश्वरि स्व
तंत्रस्य महेशस्य सर्वभाग्ययुतस्य मे ॥ किं नाम क्रियते देवि पूजया वा सुमैः शिवे ॥ लोकसंरक्षणार्थाय लिंगे गृह्णामि पू
जनं ॥ भक्तैर्मम कृता पूजा तुष्ट्यै भवति शोभने ॥ सूक्ष्मं मदीयं लिंगं तत् पश्यंति शिवयोगिनः ॥ कथमन्येऽपि पश्यंति नानाको
मैककामिनः ॥ सखंडान्यन्यलिंगानि अखंडं त्वेकं मम ॥ लिंगमेतन्महादेवि ज्ञानदृष्ट्या न पश्यति ॥ न ह्यातं वेदवाक्ये
श्च ज्ञायते मत्कृपाबलात् ॥ यस्य चिद्दृष्टिभाग्येन सभाग्यस्यैव शांकरि ॥ निर्भाग्यानां महादेवि न ज्ञानं नैव जायते ॥ मत्कृ
पापात्रमेवं हि शैवगात्रं गिरींद्रजे ॥ शैवेः शैवैकशरणः शिवलिंगार्चनप्रियः ॥ शिवक्षेत्ररतो नित्यं श्रीरुद्रजपतत्परः ॥
भस्मरुद्राक्षसंपन्नः षडक्षरजपादरः ॥ शैवसंपूजको नित्यं शिवनैवेद्यभोजनः ॥ मन्नामपरमो नित्यं सत्कार्यसुरकीर्तनः
शिवशंभो महादेव प्रसीदेति वदन्मुदा ॥ आपादमस्तकं भस्म समुद्धूल्य यथाविधि ॥ रुद्रावर्तनशीलो यः समे समक्रः सदा
च्छिन्नं ॥ वेदवेदांतवाक्यैश्च बोधज्ञानपरः सदा ॥ न सैव जायते ज्ञानं नान्यथा कर्मकोटिभिः ॥ असत्यमितरत्सर्वं त्रैगुण्ये
परमेश्वरि ॥ आविद्यकानि शास्त्राणि मिथ्याज्ञानप्रदानि हि ॥ मच्छास्त्रसत्यमेवेदं ब्रह्मैवेदमिति श्रुतिः ॥ आत्मैवेदमिदं दृ
श्यं तस्मिन् जगदिदं मृषा ॥ जगत्प्ररोचनार्थाय शास्त्रे सत्यत्वकल्पयिष्यति ॥ मद्दानां स्वर्गनरकपुण्यपापादिवासनाः ॥ त्रैगु
ण्यविषयो वेदः स्वाधिकारानुरूपतः ॥ पुण्यपापफलं भोक्तुं व्यावहारिकवर्त्मनः ॥ सर्वं तरति वेशो वं शैवो मत्पादसंश्र
यः ॥ अत्रेतिहासं वक्ष्यामि नागनाथस्य वैभवं ॥ मम लिंगात्मनो देवि शृणुष्व वरवर्णिनि ॥ स च क्षुत्रवसो राजा शे

बोन्नेषगुणैर्युतः ॥ ब्रह्मणा समनुज्ञातो भूमिसंधारणाय वै ॥ इत्थं वासपदेतत्वनोसाब्धि द्वीपोरूपननं ॥ विषादमगमं तीव्रं शेषो मां
शरणंगतः ॥ आवद्वक मिदं क्षेत्रं प्राप्य कुंडं तथाकरोत् ॥ नागकुंड मिति ख्यातं तत्तीरे तपसि स्थितः ॥ स्वपुच्छवेष्टनैर्धृ मिमपि छायो
ध्ययन्पूर्णाः ॥ मां विलोक्य महादेवि भस्मरुद्राक्षभूषणाः ॥ रुद्रमावर्तयंस्तस्थौ शारदां शतमुत्तमां ॥ लिंगं सुचक्षुषा पश्यं क्षुधासं
श्रवन्वृथा ॥ शेषः पवनकं भुंजन्संतपसा शोषयंस्तनुः ॥ ग्रीष्मकुसरितेभानुश्चंद्रभानुकरैर्यथा ॥ ब्रह्माद्याः देवताः सर्वा इंदुनेनतप
सि स्थितं ॥ समागतास्तदा देवितान्सर्वान्कुंडलीश्वरः ॥ अगणय्य तदा तस्थौ मां ध्यायन्लिंगरूपिणं ॥ तस्य तद्धार्द्धमाज्ञाय ह्यंददे
दर्शनं शिवे ॥ दृष्ट्वा मां स्वपणा विश्वननाम शिरसा शिवे ॥ सहस्रवदनेनापि नाम्नां साहस्रतः शिवे ॥ अपूजयद्बिल्वपत्रैस्तुष्टाव जग
दीश्वरं ॥ ॥ शेष उवाच ॥ विश्वेश विश्वमदनांतक विश्वमर्ते विश्वंभराधरणकारणशाकिदायिन् ॥ भर्गांतकांतक महेश्वर कृत्ति
वासः पाश्यामलामखिलजगत्सनकादिपाल ॥ पाहीश मामवधियापरिपाहि शंभो दक्षाश्वमेधविधिशिक्षणकामशत्रो ॥ सुत्रामवज्र
करदारणचंदुकेश गोत्रात्मजा सरवसुजातपुरांनिहंत्रू ॥ मामीश मामवधियापरिपाहि शंभो ॥ पिनाकविलसत्करं दिवसनायकानग्ने
तं विनायकसुतप्रियं भजत नाकनाथस्तुतं ॥ यामिनीरमणशोभि मस्तकं भामिनीविधृतसामिविग्रहं ॥ योगिनीगण तस्तुतिप्रि नी ५
यं मोक्षिनीपतिमुपास्महे शिवं ॥ चारुभूधरविहारिणं योगियोगकृतकंठभूषणं ॥ क्षिप्रदग्धपुरकामवैरिणं चंद्रखंडचर रू ५
णं भजेन्वहं ॥ इति स्तुतो हं शेषेण भक्तियुक्तेन शंकरि ॥ धराधरणसामर्थ्यं मया दत्तं तदांबिके ॥ तेन संप्रार्थितं चापि स्वकुंडख्या
तिमेष्यतु ॥ नागकुंड मिति ख्यातं सर्वपापहरं भुवि ॥ तस्मिन्कुंडवरे स्नात्वा नागनाथं प्रणम्य च ॥ विषचोरभयं तस्य न कदाचि
न्नेव जायते ॥ तर्पयित्वा तु तत्तोयैः पिबन्प्रीणाति मानवः ॥ स्नात्वा तिरात्रयज्ञस्य फलं प्राप्नोति मानवः ॥ एवं मनोवरंद्ध्यास

शेषोविवरंययौ॥सपर्वतनदीमुक्तां दधेभूमिंतदांबिके॥ ॥ईश्वरउवाच॥कद्रु सुपर्णीचपुरा विवदेतेपरस्परं। अश्ववालांस्तदा
श्वेतान कृष्णोश्वेत्र विषाग्निना॥दासंसख्याःपुराकृत्वा अमृतेनैव सापुरा॥तच्छापनुत्तयेगौरि नागनाथंप्रणम्य सा॥सापुत्रान्मोच
यामाससुपर्णभयपीडितान्॥भक्षणार्थंमदंगानांपुत्रान्दत्तवतीतदा॥कंबलाश्वतरौनागौकर्णकुंडलतां गतौ॥वासुकिस्तक्ष
कश्चैवमहाहारकंकणौ॥मत्प्रसादनपरौदेविशंखपालेन्द्रपत्रकः॥स्वकंठहारशोभायैधृतराष्ट्रः पिन्डिप्पिलः॥पुत्रान्मह्यंतदादत्वा
साकद्रूर्वीतकल्मषा॥नागनाथंतदामां सानुष्टावाथकृतांजलिः॥ ॥कद्रूरुवाच॥पुत्रस्ते विश्वपतिर्महीसुरवरं मल्लनि
हृत्प्रसादरदेवानामक्षयं ददौस्वर्गवास्वर्लोकवासंचिरं॥शक्राद्यामरपुंगवैः सेतदासत्प्रसादपूजाबलैर्लोकज्ञुर्ये कृतवेतनस्तुति
परस्तांसेवतेसर्वदा॥कुमारशिखरोनमेधनवरोरुशाकीशायः सतारकमुखासुरान्निखिलश्चरपद्यादिकान्॥निहत्यानिखिलैः
सुरैरमरसैन्यनाथोभवत्त्वदीयपदसेवयाशिवसूनागनाथप्रभो॥नीलकंठकृतवाहनमुख्यस्तारकारिरखिलामरवंद्यः॥स
द्यएवकुरुतादघनाशंसैन्यनायकइतिश्रुतिषट्कः॥मोरेश्वरक्षेत्रनिवासशीलेश्वलोकसूनुःप्रथितोरुभुंडः॥त्वत्सादपद्मप्रणा
तोरुगंडो गंडस्थलांदोलितपद्मषंडः॥त्वंगणाधिपतिरीशपाद मांत्वसुतोगणपतिःश्रुतिश्रुतः॥विघ्नजालहुरितेममहन्याद्दं
डिताखिलसुरारिसमूहः॥इतिस्तुत्वातदाकद्रूर्ययौसाकाश्यपंमुनिं॥नागनाथंगणस्पेशं बिल्वपत्रैःसमर्चयत्॥नागनाथं
महालिंगदर्शनात्स्वर्गमोक्षदं॥तल्लिंगमहिमादेविलयिसंकीर्तितोमया॥श्रुत्वत्वदंष्ट्रमेधारीममसंगिपरोभवेत्॥तत्रबिल्व
वनेदेविमल्लिंगपरितांबिके॥शिवध्यानरताःशैवास्तिष्ठंतेमसदाश्रयाः॥५ तत्रोषितेपुण्यंस्वर्गापेपुत्रपदंनृणां॥दर्शनात्त
स्यलिंगस्यमोक्षभागीभवेन्नरः॥ ॥ईश्वरउवाच॥तस्मिन्पावनपावनेहि विपिनेमालूरसंघावृतेतमुषोथमरं

श्रीः
४१

द[illegible]सुंदररजोगुंफीकृतैस्तु द्विलैः॥नद्वातैःसुरवशीतलैःफणिफूत्कापूत्कारतापापहैः॥शीतैकृसममांगगंधमरविंदैर्लिंग
न्वसाम्यं बिके॥नद्दःध्वंवनामिसवैमिगिरिजेयसिनबिल्वद्रुमस्तामिनेवबसामि ज्ञा एविज्ञतकै यु क्तोपि पुष्पान्विते॥श्रलेवापिमरुस्थ
लेपिनिवसे स्रूयोनुजःकेवलं तन्मले शिवलिंगसंगतवपुस्तुवोवसाम्यं बिके॥श्रीवृक्षप्रसवैर्नवैवारुणदलैर्येःसायमभ्यर्चयेद्देव
लिंगवरंप्रदोषसमये सन्नामदेनांभसा॥तस्याहं वितरामिमुक्तिमखिलांमुक्तिं तथा तेंबिके त्रिःकृत्वःप्रवदामिसत्यमधुनासम्यक्श्रृ
णुष्वादरात्॥ ॥७॥ ॥इतिश्रीशिवरहस्ये पंचमांशे शिवगौरीसंवादे नागनाथ विभवोनामाष्टादशोध्यायः॥ ॥१८॥
॥७॥ईश्वरउवाच॥ ॥असेकंक्षेत्रमबले पृच्छसीश्वरसंज्ञितं॥ज्योतिर्लिंगंमहादेवि श्रृणु तन्महिमो पुनः॥इतरला
पुरासर्वे क्षीरसागरपर्वकाः॥समुद्रास्ते तु संक्षयतनयोतप्यंतदारुणं॥परिम्लानमुखाः सर्वे वेलाकल्लोलवर्जिताः॥इतमेडंयथा
भातिदधिभांडं सुराधिपे॥निःसारश्च तास्तिस्साराःसागरा मामुपाययुः॥भस्मनोद्धूलसर्वांगरुद्राक्षवरकंकणाः॥जपंतःशत
रुद्रीयं पंचाक्षरपरायणाः॥लिंगपूजापरानिसंघमणीशार्चनेरताः॥बिल्वपत्रैश्चकमलैःरक्तनीलोत्पलैरपि॥ततःकालांतरेदेव
स्तेषांप्रादुरभूत्सुरः॥दृष्ट्वाशिवंतुष्टुवुस्ते समुद्रामांतदांबिके॥ ॥रागे॥ ॥पुष्पमालं पुरारातिमरातिमन्मथस्यच॥अंतक
√च स्यैदेवशंमहेशंवृषभध्वजं॥अंधकांतकमाशास्यं त्रियंबकमुमासखं॥प्रणमामोमहादेवमुदारांगंकृपर्दिनं॥महोदारस
द्रलहारोरुकंठं मुसं ठीकरालंगरा नीलकंठं॥पठद्रुद्रजाप्याघभारंहरंतंमहाकामठत्वकपरीतं तुठंतःसदानोभवाब्धौ
परित्राहित्रशो॥नवोपिद्दद्दाच्या विधिनियतभारात्मकं नयासदाने दृष्टश्चेवयेचसद्भितोपासनपरः॥सदृवानुग्राह्यस्त्वदृष्टि
सततं हृद्यतमदृसहोक्षावेक्षावैर्सेवहूरसवा भिंसतरते॥नवगुणगणनावाकेनकार्योमहेशश्रुतिशिखरनिविष्टःशांत

चित्रैकगम्यः॥ भुवनभवनमध्ये कश्चिदस्त्येव रंगो नवपदकमलोत्थामोदसंमोदितात्मा॥ अस्मिन्महत्सर्णवगस्तमीशाः विश्वे
शमाद्यास्यह तिष्ठसिद्धाः॥ निषंगभूतान् भवतश्च सागरानस्मान्यथाब्धिर्महेश दृष्ट्वा॥ इति सागरवाक्यानि श्रुत्वा दूर्गिरिजे तदा
तेषां प्रसन्नोह्यभवं स्तैस्तदा परयामिवा॥ रत्नैरनर्घ्यैः शतशस्तिमिंगिलगणैस्तदा॥ पुरांधकासुरे हत्वा तद्रक्तार्क्तं करे मम॥ नचार्य्यमि
तिदेवेशि ...सोप्यूल्भे महत्तरो॥ तदा संक्रमयादेवि चुलकणीश्वर संनिधौ॥ शूलपातमभून्नाम्ना तीर्थं सुमनोहरं॥ तन्महागरजलैः पू
र्णं शूलपातं महत्सरः॥ वसंतिश्वो वा नियतं शूलपात सरस्तटे॥ पंचाग्निनिरताश्चान्ये वायुभक्षास्तथापरे॥ अंगुष्ठकुष्टाम्बुदाद्दृवि
दंतोलूखलिनस्तथा॥ सर्वे मल्लिंग पूजाभिरेयंसायुर्मुनीश्वराः॥ मत्स्माध्ययनाः सदा गौरि शिवनामजपादराः॥ तत्र तान्सततं दृ
ष्वानि लिंपाक्षयकंपिता॥ दृष्टोपंदेवं च यिताविश्चोर्दैवपदं मुच॥ तेषां वांछानिवगौरि मत्प्रदाचोपरायणाः॥ तृणाप्येत महेशानि वि
प्रादीनां पदेशिवे॥ मत्सादभाव सवल्लोभधानं भितयः सदा॥ पदे पदे भविष्यंति भाकुकानि न संशयः॥ सवार्णियतं सत्यं मम भ नि ६ श्रीः
क्तस्य वे वक्तो॥ मज्जन्न वर्यैर्व्यसंस्त्वालोकाः सर्वे चतुर्दश॥ अगस्त्येनापि भक्तेन समुद्राः शुबकीकृताः॥ वीरभद्रगणेनापि ब्रह्मविष्ण्वादयः
सुराः॥ दक्षयज्ञे तदा गौरि सिक्षिताश्चापि रंजिताः॥ एतादृशा वो भक्तानां सुरेपुगण नापिना॥ किं चतुर्दशलोकेषु प्रेयाते संभवि ४२
ष्यति॥ आपातमधुरा सा श्रीः संयोगाद्विवियोगजा॥ धनधान्यानि सर्वाणि रत्नानि। विविधं वसु॥ नश्वराण्यति दुःखानि भ
यमूलानि शांकरि॥ मम भक्तिः सदा गौरि अनश्वर धनं सुखं॥ मुक्तये मम भक्तिश्च बंधाय नरकाय च॥ धनं तत्क्षेत्रं [illegible]
रि सर्वापन्निलयं सदा॥ आनंदकं देम [illegible] मोक्षदा कामदा ध्रुवं॥ तया भक्त्या विराजंते चंद्रे रवैव शारदी॥ मद्भक्ताः नियताः

सर्वे वसंति शिवपूजकाः ॥ स्त्रीकृतं दुर्चेद्राणां तेषां स्वर्गस्तु तुच्छकः ॥ अच्छानां च निरिच्छानां मच्छासनयतात्मनां ॥ आनंदं संदृत
स्वांत आनंदघनपूजया ॥ तत्रैव शिवरसास्वादनंदिताखिलवृत्तयः ॥ घुसृणीशपदद्वंद्वपद्माक्षापितकल्मषाः ॥ वसंति संततं शैवास्तस्मि
न्क्षेत्रे गिरींद्रजे ॥ ॥ पार्वत्युवाच ॥ कुत्र क्षेत्रमिदं शंभो त्रिनेत्र प्रियकारकं ॥ तत्क्षेत्रमहिमापारं कथाश्रवणलालसं ॥ मम चित्तमं
भद्वं वद यथा तद्वद स्वमं ॥ शिवो गौरीवचः श्रुत्वा तत्क्षेत्रमाह शंकरः ॥ ॥ ईश्वर उवाच ॥ श्रीमरथ्याउदग्भागे त्रिशृंगे शोपरि स्थितः ॥
श्लुपात सदा तीर्थं तत्रास्ते वशिवालयः ॥ श्लुपातसरस्तीरे ततापपरमं तपः ॥ उद्दालको मुनिर्नाम्ना ज्ञानार्थं शंकरं तदा ॥ समस्तपर्व्येम
हादेवं बिल्वपत्रैर्महेश्वरं ॥ घुसृणीशं महादेवमानुष्टाव तदा विभुं ॥ ॥ उद्दालक उवाच ॥ घुसृणीश महेश शंकर त्रणतामरभ
रुह प्रसीद शंभो दुरितापह पादपद्म माद्यं घुसृणा रणमानतोस्मि ते द्य ॥ अरुण तरणि वह्नि सोमनेत्रं करुणाशांति सुधायुता
द्य यागं ॥ घुमणिप्रभ चारु देहकांतिकांत घुसृणीशानुनतोस्मि देवराजं ॥ वरुणाद्यमरार्चितां घ्रियुग्मं वरुणालयदेहपूज्य
पादं ॥ सगणाधिप शोभितोरु मौलिं घुसृणीशानं नतोस्मि तपदाब्जं ॥ मरणावसरे न कोपि शंभो विनिवारक इह सर्वे मिलुध्या
शरणं चरणं शिव त्वदीयं घुसृणीशान नतोस्मि दुःखनाश ॥ करुणाबर देव दीनबंधो सरणिं देहि विमुक्तिमार्गहेतो ॥ करणं
विनिवेशयाद्य भूते पदाब्जे घुसृणीशान नतोस्मि भक्तियुक्तः ॥ उद्दालकसंहृतेनैवं मुनिनोद्दालकेन च ॥ संस्तुतः परमेशानस्त
स्य दृष्टिपथं गतः ॥ प्रणतोथ पिनाकोपादयोः पतितो मुनिः ॥ वरेण छंदितश्चापि स उवाच कृतांजलिः ॥ ॥ उद्दाल
क उवाच ॥ ज्ञातुमिच्छामि तज्ज्ञानं वेदवेद्यमतेश्वर ॥ न ज्ञानेन विना मुक्तिरिति वेदा वदंति हि ॥ उद्दालकस्य वचसा त
स्तुष्टो हि सुतोषितः ॥ तमवोचं तदा देवि प्रोज्ज्वलिं पुरतः स्थितं ॥ वत्सोद्दालक ते ज्ञानं साम्यत्र्यया चानन्ययात व ॥ तज्ज्ञानं दातु

१०नंदी॥ दृष्टं गर्भगृहे तु मात्र जनिता पारमथा ताडितो वानो शाखिलवेगपीडितनतुः योन्यनुमुखान्निसृतः

मिच्छा मिथ्वं चैके वाच्यितच्छृणु॥ नाविरक्तस्य संसाराद्मुक्तं तज्ज्ञानमुत्तमं॥ नो बोधं च भवेद्देवाविरक्तस्य तु संसृतौ॥ ज्ञानसरसखि
लं ज्ञानं निम्नमापो यथा मुने॥ नाविरतो दुश्चरितादि साहृश्रुतिरादरात्॥ तस्मादेव विरक्त्यर्थं भवदुःखानिमे श्रुणु॥ गर्भे
तावद्धि दुःखानां शतानि मुनिपुंगव॥ इत्थं संबोधितो द्वाभ्यां प्राहेति सा शिवो वदत्॥ तदेतच्छृणु देवेशि सावधानमनाः सुखे
ईश्वर उवाच॥ श्रृणु द्वावकदुःखानि संसारस्य विशेषतः॥ मामप्राप्य नरो बाढं दुःखान्यसौ तमश्नुते॥ गर्भे पेशीगतो जंतु
र्मांसदास्तीति मोचकौ॥ तद्दुःखानि श्रुणु धार्ये वैराग्यार्थं शिवे सदा॥ हा हा गर्भनिवासदुःखमधुना वक्तुं नवेतक्षमं कः
सोढानस्वाग्नि दुःखजातवेभोक्तुं कथं कान्ततः॥ कुंभीपाकासिपत्रैः यदु नरगतयाताडुनैस्तक्षमार्गैः संतप्तभ्राष्ट्रजाले मे
ज्जल्लवसाफयकुंडोश्चकीटैः॥ वस्तुनेच्छामिगर्भे मलजलकलितापारदुर्गंधिपूरे मातुःकुक्ष्यु इवास्थिचक्रकचाकृणत
नुःकीटदंष्ट्राविद्धः॥ अंतर्ज्वलधर्मस्तंकटुविदाहिरसैर्मात्रभुक्त्याविद्धः ध्वंशक्राक्लिन्नांत्रबद्धः शिवशिवशिव मो मोचय
धाश्रु संभो॥ पयोधरः पयः प्लुते निःसृतपीतकुक्षी हृदो महे स्थी विविधान्नकैः सम्यक्पूर्यमाणोदरः॥ अधोमुखवि ९२
लंबित हृदयको शपेशीगतः॥ कदा खलु भवसदाशिव भजामि यान्नुष्मितः॥ मानं तत्रिखिलं जहाति शिशुराजातः सन्न
तसिवंर दुर्गंधादिमलाविलाखिलतनुः योन्युन्मुखान्निःसृतः क्लांतोधि कदुःशयः॥ क्षुत्कालेन रवैरितिरौति विव
शो शीतादितापासहः स्वादूत्मं मुहुरीक्षते हृदतरं बालातिको मारके॥ पित्रा घैर्गुरुभिश्च सोक्षरविधौसंताडितो भी
तिमाक्रोगाद्यैस्तदुपायकारिभिषजैः कटुकाथयभुक्॥ मारोन्मादशरैर्विदारिततनुः कांतामुखावीक्षते सो

साहं शारदेंदुकुंदरदनावन्के जगन्नरपति॥ न ह्याप्यर्थमुदारहोवलयान्वासोसिधान्यं धनं चौर्येणापि समार्जयत्यति
तरां स्त्रग्गंधतांबूलके॥ निष्टसामन्तके सकुंभविलसत्कांताकुचालिंगनैः पीनश्रोणी कटीनटांतरदंतैर्दंतेक्षणः कामुकः॥
रेभास्ते भनिशोरुभोगकलनैः संसारवार्तारसैः पापैर्धान्यधनार्जनादिविवशः कालं नयत्यादरात्॥ यातायातशतैर्धन
